संस्कृत-वार्ता:
17.06.2024
सायम् - 06:20

**मुख्यवार्ता:**

- पश्चिम-बङ्गाले दुरापादितायां रेल-दुर्घटनायां रेलविभागस्य अधिकारित्रयं समेत्य अष्टौ जनाः मृत्युमुपगताः।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना रेल-दुर्घटनायां गभीरं दुःखं प्रकटितम्। प्रधानमन्त्री राष्ट्रिय-साहाय्य-कोषात् प्रत्येकं मृतकस्य परिजनेभ्यः दश-लक्ष-रूप्यकाणि प्रदास्यन्ते।
- केन्द्रीयगृहमन्त्री अमितशाह: नवदिल्लयां मणिपुरस्थितिं समीक्षितुं उच्चस्तरीयोपवेशनस्य अध्यक्षताम् अकरोत्।
- भारत-अमेरिकयो: मध्ये द्वितीयं वार्षिकं उदीयमान प्रौद्योगिकी सम्बद्धं उपवेशनं नव-दिल्ल्यां प्रचलति।
- जम्मू-कश्मीरस्य बान्दीपुरा जनपदस्य अरगाम-क्षेत्रे अद्य सुरक्षाबलैः सह सङ्घर्षे एकः आतङ्क-वादी मारितः ।
- ईद- उल अजहा पर्व अद्य देशस्य पृथक्-पृथक् भागेषु परम्परा-पूर्वकं परिपाल्यते।
- विंशति प्रति-विंशति-इत्येतस्यां क्रिकेट-प्रतिस्पर्धायाम् अद्य न्यूजीलैण्डदलं पापुआ न्यूगिनी दलं सम्मुखी करिष्यति।

**बङ्गाल-रेलदुर्घटना**

पश्चिम-बङ्गाले दुरापादितायां रेल-दुर्घटनायां रेलविभागस्य अधिकारित्रयं समेत्य अष्टौ जनाः मृत्युमुपगताः। रेलवे बोर्ड इत्यस्य अध्यक्षा जया वर्मा राजधान्यां नवदिल्यां वार्ताहर-सम्मेलने उक्तवती यत् साहाय्योद्धार-कार्यं सम्पन्नम्। अस्यां दुर्घटनायाम् आहत्य पञ्चाशत् जनाः मृत्युमुपगताः। प्रधानमन्त्रिणा नरेन्द्रमोदिना रेल-दुर्घटनायां गभीरं दुःखं प्रकटितम्। सामाजिक-सञ्चार-पटले प्रधानमन्त्री अलिखत् यत् पश्चिम-बङ्गाले दुरापादिता रेल-दुर्घटना दुखावहा विद्यते। अमुना मृतकाणां परिजनान् प्रति संवेदना व्यक्तीकृता। प्रधानमन्त्रिणा व्रणितानां शीघ्र-स्वस्थ-लाभस्य कामना कृता। श्रीमोदिना रेल-विभागस्य अधिकारिभिः सह संवादं विधाय स्थितिः परिज्ञाता। रेलमन्त्री अश्विनी वैष्णवः अवोचत् यत् प्रधानमन्त्री राष्ट्रिय-साहाय्य-कोषात् प्रत्येकं मृतकस्य परिजनेभ्यः दश-लक्ष-रूप्यकाणाम् प्रत्येकं गभीरतया व्रणितेभ्यः सार्ध-द्वि-लक्ष-रूप्यकाणाम् अथ च प्रत्येकं सामान्यतया व्रणितेभ्यः च पञ्चाशत् सहस्ररूप्यकाणि प्रदास्यन्ते। अत्रान्तरे राष्ट्रपतिः द्रौपदी मुर्मुः रेलदुर्घटनायां दुःखं प्रकटितवती । एकस्मिन् सामाजिक-सञ्चार-पटले तया लिखितं यत् रेलदुर्घटनायां जनहानिः कष्टप्रदा विद्यते।

**रेलयानपरिचालनं-बाधितं**

पश्चिम बंगालराज्यस्य रंगपानी-रेलवे-सन्धि-स्थानकं समीपं रेल-दुर्घटनाया: अनन्तरं बारसोई-न्यू-जलपाईगुड़ी-रेलखण्डे रेल-सेवापि प्रभाविता जाता। कटिहारस्य मण्डल-रेल-प्रबन्धक: सुरेन्द्रकुमार: अकथयत् यत् दुर्घटनेयं अनुभागस्य अधोगतपट्टिकायां उत्पन्ना। दुर्घटनाम् अभिलक्ष्य वन्देभारत एक्सप्रेस-डिब्रूगढ़-नई दिल्ली राजधानी एक्सप्रेस-रेलयानानि समेत्य नवरेलयानानां मार्गाः परिवर्तिताः। जनानां साहाय्यार्थं पृथक् पृथक् क्षेत्रेषु साहाय्य-पटलानि स्थापितानि। कञ्चनजङ्गा रेलयान-सम्बद्धः दूरभाष-क्रमाङ्कः वर्तते- 033-23508794, 033-23833326 इति।

## सिक्किमे तोयप्लाव:

जलप्लाव-प्रभावितस्य सिक्किमस्य मङ्गन-जनपदस्य चुङ्गथाङ्ग क्षेत्रे अवरूद्धान् पर्यटकान् निष्कासितुं साहाय्य-कार्यम् अद्य पुन: आरब्धम्। मङ्गनस्य जनपदाधिकारी हेमकुमार-छेत्री आकाशवाण्या: वार्ता: प्रभागम् अवोचत् यत् अरूद्धान् पर्यटकान् प्रभावित क्षेत्रेभ्य: निष्कास्य राजधान्यां गङ्गटोक-नगर्यां प्रापणम् आरब्धम्। प्रतिकूलेन ऋतुचक्रकारेण पर्यटका: वायवीयमार्गेण प्रत्यानेतुं न शक्यन्ते, मङ्गन-जनपदस्य लाचुङ्ग-चुङ्गथाङ्ग-क्षेत्रयो: अवरूद्धान् द्विसहस्र-पर्यटकान् निष्कासितुं दिनद्वयात् प्रयासा: विधीयन्ते। अत्रान्तरे राज्ये अनवरत-वृष्ट्या भू-स्खलनेन च इदानीं यावत् नव जना: मृता: प्रबल-वृष्ट्या राज्यस्य प्रमुख-मार्गा: क्षतिग्रस्ता: सन्ति, सीमा सड़क-संगठन-इत्येतत् प्रभावित-क्षेत्रेषु पथ-सम्पर्कं साधितुं प्रयासान् विदधाति।

## शाह:-मणिपुर:

केन्द्रीयगृहमन्त्री अमितशाह: नवदिल्लयां मणिपुरसुरक्षास्थितिं समीक्षितुं उच्चस्तरीयोपवेशनस्य अध्यक्षताम् अकरोत्। केन्द्रीय-गृहसचिव: अजयभल्ला: आसूचनाभिकरणप्रमुख: तपनडेका थलसेनाध्यक्ष: जनरल मनोजपाण्डे: मणिपुरस्य आरक्षि-महानिदेशक: राजीव-सिंह: अन्ये च वरिष्ठाधिकारिण: उपवेशनेऽस्मिन् सम्मिलिता: अभवन्। ह्य: केन्द्रीय-गृहमन्त्रिणा अमितशाहेन जम्मू-कश्मीरस्य सुरक्षास्थितिं अथ च अमरनाथयात्राया: सज्जतां समीक्षितुं एकमुच्चस्तरीयोपवशनं विहितम्।

## विदेशमन्त्री अमेरिका

भारत-अमेरिकयो: मध्ये द्वितीयं वार्षिकं उदीयमान प्रौद्योगिकी सम्बद्धं उपवेशनं नव-दिल्ल्यां प्रचलति। अस्मिन् उपवेशने राष्ट्रिय सुरक्षा परामर्शद: अजित डोभाल: विदेश-मन्त्री डॉक्टर- सुब्रमण्यम जयशङ्कर: अमरीकायाः राष्ट्रिय-सुरक्षा-परामर्शद: जेक सुलिवन इत्येते उपस्थिता: सन्ति। उभयोः पक्षयोः मिथः व्यापक-द्विपक्षीय-क्षेत्रीय-वैश्विक-प्रकरणेषु विशेष-चर्चा विधीयते।

## जम्मू-कश्मीरे आतङ्क्याक्रमणम्

जम्मू-कश्मीरस्य बान्दीपुरा जनपदस्य अरगाम-क्षेत्रे अद्य सुरक्षाबलैः सह सङ्घर्षे आतङ्क्योके मारितः । आरक्ष्याधिकारिणाम् अनुसारम् अस्मिन् क्षेत्रे आतङ्कवादिनां निगूढनस्य सूचनाधारेण सेनया केन्द्रीय-रक्षितारक्षिबलेन जम्मू-कश्मीर आरक्षिबलेन च अरगाम-इत्यत्र संयुक्ताभियानं प्रचालितम् । सुरक्षा-बलानां संयुक्त-दलं यदा सन्दिग्ध-स्थलम् उपगतं तदैव निगूढातङ्कवादिभिः अनारतं गोलिका-प्रहारम् आरब्धम् । सुरक्षा-बलानां प्रत्युत्तरे एकः आतङ्कवादी मारितः। अन्तिम-वार्ताः लेखन-समयं यावत् अयं सङ्घर्षः प्रवर्तितः अस्ति।

## मुम्बई-चलचित्र-समारोह:

वृत्तचित्र-लघुकथा-चित्रसञ्जीवन-चलच्चित्रेभ्य: अष्टादशतम: मुम्बई-अन्ताराष्ट्रिय-चलचित्र-महोत्सव: समारब्ध:। अद्य तृतीये दिवसे **माईफादर-वी शुड ऑलबी-फ्यूचरिस्ट लाइफ-इन-लूम पुकार-शान्ति-इनसाइड आउट टू**-इत्यादिनि चलचित्राणि प्रदर्शितानि। प्रात: **अनलॉकिंग-द फोर्स-चैनलिंग डॉक्यूमेंट्री फिल्म्स टू ड्राइव सोशल-चेंज** इत्यनेन शीर्षकेण एका विशेषज्ञै: युता चर्चा आयोजिता। एतस्मिन् सत्रे भारतीयनिदेशक: डॉ. तालकाडु श्रीनिवासैया नागभरण: अपि च राष्ट्रिय-चलचित्र-विकास-निगमस्य महाप्रबन्धक: डी. रामकृष्ण: च भागं स्वीकृतवन्तौ। षड्-दिवसीय-महोत्सवस्य अस्य समापनं एकविंशति: दिनाङ्के भविष्यति।

## प्रधानमन्त्री-उत्तरप्रदेश-बिहार:

प्रधानमन्त्री नरेन्द्रमोदी श्व: उत्तरप्रदेशस्य वाराणसीनगर्यां प्रधानमन्त्री-किसान-सम्मान-निधि-योजनान्तर्गतं विंशति-सहस्र-कोटि-रुप्यकाणां सप्तदशतमं देयराशिं प्रसारयिष्यति। देयराशे: धनं प्रत्यक्षतया षड्विंशति-लक्षाधिक-नव-कोटि: लाभार्थि-कृषकाणां वित्तकोषेषु सम्प्रेषयिष्यते। एतस्मिन् कार्यक्रमावधौ श्रीमोदी स्वयं-साहाय्य-समूहानां त्रिंशत्सहस्राधिकाभ्य: महिलाभ्य: कृषि-सखी-इत्यस्यान्तर्गतं प्रमाणपत्राण्यपि वितरिष्यति। तदनु प्रधानमन्त्री नरेन्द्रमोदी अस्य मासस्य अष्टादश नवदश च दिनांकौ उत्तरप्रदेश-बिहारयो: भ्रमणं करिष्यति। श्व: सायं श्रीमोदी दशाश्वमेध-घट्टे गङ्गा-आरार्तिक्यां समुपस्थितो भविष्यति तदनन्तरं काशी-विश्वनाथ-देवालये पूजां दर्शनञ्च करिष्यति। नवदशदिनांके च प्रात: प्रधानमन्त्री नालन्दाया: भग्नावशेषाणाम् अवलोकनार्थं तत्र गमिष्यति। एतदनन्तरं असौ बिहारस्य राजगीर-स्थले नालन्दा-विश्वविद्यालयपरिसरस्यापि उद्घाटनं विधास्यति। अत्रावसरे जनसभां एकामपि सम्बोधयिष्यति

## ईद पर्व

ईद- उल अजहा पर्व अद्य देशस्य पृथक्-पृथक् भागेषु परम्परा-पूर्वकं परिपाल्यते, श्रद्धालव: प्रात: कालादेव नमाज प्रार्थनायै ईदगाहेषु मस्जिदेषु च समागच्छन्ति, राजधान्यां नवदिल्लयां प्रमुखोत्सव: जामा मस्जिद, फतेहपुरी मस्जिद, शाही ईदगाह इत्येतेषु स्थलेषु समायोज्यते, राष्ट्रपति: द्रौपदी मुर्मु:, उपराष्ट्रपति: जगदीप धनखड़:, प्रधानमन्त्री नरेन्द्रमोदी च ईद पर्वणि देशवासिभ्य: शुभकामना: प्रदत्तवन्त:।

## विंशति-क्रिकेट-प्रतिस्पर्धा

विंशति प्रति विंशति-इत्येतस्यां क्रिकेट-प्रतिस्पर्धायां अद्य न्यूजीलैण्डदलं पापुआ न्यू-गिनी-दलं सम्मुखी करिष्यति। प्रतिस्पर्धेयं त्रिनिदाद-नगरे भारतीय-समयानुसारं रात्रौ अष्टवादनतो स्पर्धिष्यते। इत: प्राक् अद्य प्रात: क्रीडिते द्वन्द्वे सेण्ट लुसिया नगरे श्रीलङ्कादलेन नीदरलैण्डदलं त्र्यशीति: धावनांकै: पराजित्य निज-प्रथम: विजय: समधिगत:।

।। इति वार्ता: ।।